শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রী রুক্মিণী সন্দেশঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥শ্রী রুক্মিণী সন্দেশঃ ॥

শ্রীরুক্মিণ্যুৱাচ

শ্রুত্ৱা গুণান্ ভুৱনসুন্দর শৃণ্ৱতাং তে
নির্ৱিশ্য কর্ণৱিৱরৈর্হরতোঙ্গতাপম্।
রূপং দৃশাং দৃশিমতামখিলার্থলাভং
ত্ৱয্যচ্যুতাৱিশতি চিত্তমপত্রপং মে॥ ১ ॥

কা ত্ৱা মুকুন্দ মহতী কুলশীলরূপ-
ৱিদ্যাৱযোদ্রৱিণধামভিরাত্মতুল্যম্।
ধীরা পতিং কুলৱতী ন ৱৃণীত কন্যা
কালে নৃসিংহ নরলোকমনোভিরামম্॥ ২ ॥

তন্মে ভৱান্ খলু ৱৃতঃ পতিরঙ্গ জাযা-
মাত্মার্পিতশ্চ ভৱতোত্র ৱিভো ৱিধেহি।
মা ৱীরভাগমভিমর্শতু চৈদ্য আরাদ
গোমাযুৱন্মৃগপতের্বলিমম্বুজাক্ষ॥ ৩ ॥

পূর্তেষ্টদত্তনিযমৱ্রতদেৱৱিপ্র-
গুর্ৱর্চনাদিভিরলং ভগৱান্ পরেশঃ।
আরাধিতো যদি গদাগ্রজ এত্য পাণিং
গৃহ্ণাতু মে ন দমঘোষসুতাদযোন্যে॥ ৪ ॥

শ্ৱো ভাৱিনি ত্ৱমজিতোদ্ৱহনে ৱিদর্ভান
গুপ্তঃ সমেত্য পৃতনাপতিভিঃ পরীতঃ।
নির্মথ্য চৈদ্যমগধেন্দ্রবলং প্রসহ্য
মাং রাক্ষসেন ৱিধিনোদ্ৱহ ৱীর্যশুল্কাম্॥ ৫ ॥

অন্তঃপুরান্তরচরীমনিহত্য বন্ধূং-
স্ত্ৱামুদ্ৱহে কথমিতি প্রৱদাম্যুপাযম্।
পূর্ৱেদ্যুরস্তি মহতী কুলদেৱযাত্রা
যস্যাং বহির্নৱৱধূর্গিরিজামুপেযাত্॥ ৬ ॥

যস্যাঙ্ঘ্রিপঙ্কজরজঃস্নপনং মহান্তো
  ৱাঞ্ছন্ত্যুমাপতিরিৱাত্মতমোপহত্যৈ।
যর্হ্যম্বুজাক্ষ ন লভেয ভৱত্প্রসাদং
  জহ্যামসূন্ ৱ্রতকৃশাঞ্ছতজন্মভিঃ স্যাত্॥ ৭ ॥

ব্রাহ্মণ উৱাচ
ইত্যেতে গুহ্যসন্দেশা যদুদেৱ মযাহৃতাঃ।
ৱিমৃশ্য কর্তুং যচ্চাত্র ক্রিযতাং তদনন্তরম্॥ ৮ ॥

॥ ইতি শ্রী রুক্মিণী সন্দেশঃ সমাপ্তঃ ॥